# Durgā Sūktam

[KYV TA 10-2-1]

ॐ जा॒तवे॑दसे सुनवाम॒ सोम॑मराती॒यतो॒ निद॑हाति॒ वेद॑: ।
स न॑: पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒सिन्धुं॑ दुरि॒ताऽत्य॒ग्निः ॥ १ ॥

ॐ jātavēdasē sunavāma sōmamarātīyatō
nidahāti vēdaha ।
sa na[fp]' par'ṣhadati dur'gāṇi viśh'vā
nāvēvasin'dhun' duritā (a)t'yag'niḥi ॥ 1 ॥

ताम॒ग्निव॑र्णां॒ तप॑सा ज्वल॒न्तीं वै॑रोच॒नीं क॑र्म॒फ॒लेषु॒ जुष्टां॑ ।
दु॒र्गां दे॒वीꣴ शर॑णम॒हं प्रप॑द्ये सु॒तर॑सि तर॒से नम॑: ॥ २ ॥

tāmag'nivar'ṇān' tapasāj' jvalan'tīṁ'
vairōchanīṅ' kar'maphalēṣhu juṣh'ṭāām ।
dur'gān' dēvīgm' śharaṇamaham'
prapad'yē sutarasi tarasē namaḥa ॥ 2 ॥

अग्ने॒ त्वं पा॑रया॒ नव्यो॑ , अ॒स्मान्थ्स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वा॑ ।
पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ , उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शंयोः ॥ ३ ॥

ag'nēt' tvam' pārayā nav'yō ,
as'mānth'svas'tibhirati dur'gāṇi viśh'vāā ।
pūśh'cha pṛth'vī bahulā na ,
ur'vī bhavā tōkāya tanayāya śhañ'yō-ḥo ॥ 3 ॥

विश्वा॑नि नो दु॒र्गहा॑ जातवेद॒स् सिन्धुं॒ न ना॒वा दु॑रि॒ताऽति॑पर्षि ।
अग्ने॑ , अ॒त्रि॒वन्मन॑सा गृणा॒नो॑ऽस्माकं॑ बोध्यवि॒ता त॒नूना॑म् ॥ ४ ॥

viśh'vāninō dur'gahā jātavēdas'
sin'dhun' na nāvā duritā (a)tipar'ṣhi ।
ag'nē , at'rivan'manasā gṛṇānōō (a)s'mākam'
bōdh'yavitā tanūnāām ॥ 4 ॥



www.Sanskritveda.net

पृ॒त॒ना॒जित॒ꣳ॒ सह॑मानमु॒ग्रम॒ग्निꣳ हु॑वेम पर॒मात्स॒धस्था᳚त् ।
स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॒ क्षाम॑द्दे॒वो , अति॑दुरि॒ताऽत्य॒ग्निः ॥५॥

pṛtanājitagm’ sahamānamug’ramag’nigm’
huvēma paramāt’sadhas’thāāte ।
sa na[fp]’ par’ṣhadati dur’gāṇi viśh’vāk’
kṣhāmad’dēvō , ati duritā (a)t’yag’nihi ॥ 5 ॥

प्र॒त्नोषि॑ क॒मीड्यो॑ , अ॒ध्व॒रेषु॑ स॒नाच्च॒ होता॒ नव्य॑श्च॒सत्सि॑ ।
स्वां चा᳚ग्ने त॒नुवं॑ पि॒प्रय॑स्वा॒स्मभ्यं॑ च॒ सौभ॑ग॒माय॑जस्व ॥६॥

prat’nōṣhi kamīḍ’yō , adh’varēṣhu
sanāt’cha hōtā nav’yaśh’chasat’si ।
svāñ’ chāāg’nē tanuvam’ pip’rayas’vās’mabh’yañ’
cha saubhagamāyajas’va ॥ 6 ॥

गोभि॒र्जुष्ट॑म॒युजो॒ निषि॑क्तं॒ तवे᳚न्द्र विष्णो॒रनु॒सञ्च॑रेम ।
नाक॑स्य पृ॒ष्ठम॒भि सं॒वसा॑नो॒ वैष्ण॑वीं लो॒क , इ॒ह मा॑दयन्ताम् ॥७॥

gōbhir’juṣh’ṭamayujō niṣhik’tan’
tavēēn’dra viṣh’ṇōranusañ’charēma ।
nākas’ya pṛṣh’ṭhamabhi saṁ’vasānō
vaiṣh’ṇavīṁ’ lōka , iha mādayan’tām ॥ 7 ॥

का॒त्या॒य॒नाय॑ वि॒द्महे॑ कन्यकु॒मारि॑ धीमहि । तन्नो॑ दुर्गिः प्रचो॒दया᳚त् ॥८॥

kāt’yāyanāya vid’mahē kan’yakumāri dhīmahi ।
tan’nō dur’gi[fp]’ prachōdayāāte ॥ 8 ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVeda.net